॥ओ३म्॥

**पतंजलि विश्वविद्यालय, हरिद्वार**

**मुख्य परीक्षा - मार्च 2021**

कक्षा - एम०ए० व्याकरण, द्वितीयपत्रम् | पूर्णांक - 70

विषय - संस्कृतव्याकरणम् (द्य) | पेपर कोड - MV-104

सेमे० - 01 | समय -3 घंटे

**खण्ड - (क)**

अधोलिखितेषु द्वौ प्रश्नौ समाधेयौ। (2x15=30)

प्र० 1. अचः परस्मिन्पूर्वविधौ इति सूत्रं यथाभाष्यं व्याख्येयम्।

प्र० 2. प्रत्ययस्य लुक्श्लुलुपः इति सूत्रं भाष्यदिशा व्याख्यायताम्।

प्र० 3. प्रत्ययलोपे प्रत्ययलक्षणम् इति सूत्रं भाष्यमाश्रित्य व्याख्यातव्यम्।

प्र० 4. अलोन्त्यात् पूर्व उपधा इति सूत्रं व्याख्येयम्।

**खण्ड - (ख)**

केचन चत्वारः प्रश्नाः समाधेयाः (4x5=20)

प्र० 1. स्थानिवदादेशोऽनल्विधौ इत्यस्य पदकृत्यं दर्शयित्वा प्रयोजनं प्रतिपादयत।

प्र० 2. अचः परस्मिन्पूर्वविधौ इत्यत्र पूर्वस्मात् विधिः पूर्वविधिः इति पञ्चमीसमासस्य प्रयोजनं प्रतिपादयत।

प्र० 3. स्वरदीर्घयलोपविधिषु लोपरूपे अजादेशे एव स्थानिवद्भावनिषेधः इति भाष्यानुसारं प्रतिपादयत।

प्र० 4. क्किलुगुपधात्वचङ्परनिर्ह्रासकुत्वेषूपसङ्ख्यानम् इति वचनं सोदाहरणं व्याख्येयम्।

प्र० 5. पूर्वात्रासिद्धे न स्थानिवत् इति वार्त्तिकं सोदाहरणं व्याख्येयम्।

प्र० 6. अनल्विधौ इत्यत्र विधिग्रहणस्य प्रयोजनं प्रतिपादयत।

प्र० 7. अदर्शनं लोपः अत्र अर्थस्य लोपसंज्ञायाम् इतरेताराश्रयदोषस्य कः परिहारः?

प्र० 8. नानर्थकेऽलोन्त्यविधिरनभ्यासस्वीकारे इति परिभाषायाः प्रयोजनमुक्त्वा भाष्यदिशा कथं प्रत्याख्यानमिति प्रतिपाद्यताम्।

## खण्ड - (ग)

दश प्रश्नाः समाधेयाः

(10x2=20)

प्र० 1. महाभाष्यकारस्य समासतः परिचयो दीयताम्।

प्र० 2. वार्त्तिककारस्य सङ्क्षिप्तपरिचयः देयः।

प्र० 3. कथं त्रिमुनिव्याकरणम् इति उच्यते?

प्र० 4. वा नामधेयस्य इत्यस्य वार्त्तिकस्यार्थं सोदाहरणं लिख्यत।

प्र० 5. गोत्रोत्तरपदस्य इति वार्त्तिकं स्फुटीकरुत।

प्र० 6. मालीय इत्यत्र केन वृद्धसंज्ञा कश्च प्रत्ययः?

प्र० 7. येन विधिस्तदन्तस्य इति सूत्रे विधिशब्दः किंसाधनः?

प्र० 8. तपर इत्यत्र कः समासः?

प्र० 9. आगमादेशयोः किं स्वरूपम्?

प्र० 10. अणुदित्सूत्रे अप्रत्ययग्रहणं किमर्थम्?

प्र० 11. एङ् प्राचां देशे शैषिकेष्विति वक्तव्यम् इति वचनस्य कोऽभिप्रायः?

प्र० 12. रथसीताहलेभ्यो यद्विधौ इति वार्त्तिकस्य कोऽभिप्रायः?

प्र० 13. स्वं रूपं इति सूत्रे अशब्दसंज्ञाग्रहणं किमर्थम्?

प्र० 14. सित्तद्विशेषाणां वृक्षाद्यर्थम् इति वचनं सोदाहरणं स्पष्टयत।

प्र० 15. झित्तस्य च तद्विशेषाणां च मत्स्याद्यर्थम् इति वचनं सोदाहरणं स्फुटीकुरुत।

***************